# अथाग्निपुराणस्य द्वितीयखण्डस्यानुक्रमणिका ।


| अध्याये | विषयः | पृष्ठे |
|---|---|---|
| ११५-११६ | गयायात्रा | १ |
| ११७ | श्राद्धकल्पः | १४ |
| ११८ | भारतवर्षवर्णनं | २१ |
| ११९ | महाद्वीपादिवर्णनं | २२ |
| १२० | भुवनकोषवर्णनं | २६ |
| १२१ | ज्योतिःशास्त्रं | ३० |
| १२२ | कालगणनं | ३९ |
| १२३ | युद्धजयार्णवीयनानायोगाः | ४२ |
| १२४ | युद्धजयार्णवीयज्योतिःशास्त्रसारः | ४६ |
| १२५ | युद्धजयार्णवीयनानाचक्राणि | ४८ |
| १२६ | युद्धजयार्णवीयनक्षत्रनिर्णयः | ५५ |
| १२७ | युद्धजयार्णवीयनानाबलानि | ५९ |
| १२८ | युद्धजयार्णवीयकोटचक्रं | ६१ |
| १२९ | युद्धजयार्णवीयअर्घकाण्डं | ६३ |
| १३० | युद्धजयार्णवीयमण्डलं | ६४ |
| १३१ | युद्धजयार्णवीयचक्रादिः | ६६ |
| १३२ | युद्धजयार्णवीयसेवाचक्रं | ६८ |
| १३३ | युद्धजयार्णवीयनानाबलानि | ७१ |
| १३४ | युद्धजयार्णवीयत्रैलोक्यविजयविद्या | ७७ |
| १३५ | युद्धजयार्णवीयसङ्ग्रामविजयविद्या | ७८ |
| १३६ | युद्धजयार्णवीयनक्षत्रचक्रं | ८१ |
| १३७ | युद्धजयार्णवीयमहामारीविद्या | ८२ |
| १३८ | युद्धजयार्णवीयषट्कर्माणि | ८५ |
| १३९ | युद्धजयार्णवीयषष्टिसंवत्सराणि | ८७ |
| १४० | युद्धजयार्णवीयषोडशपदका | ८९ |
| १४१ | युद्धजयार्णवीयषट्त्रिंशत्पदकज्ञानं | ९१ |
| १४२ | युद्धजयार्णवीयमन्त्रौषधादयः | ९२ |
| १४३ | युद्धजयार्णवीयकुब्जिकाक्रमपूजा | ९५ |
| १४४ | युद्धजयार्णवीयकुब्जिकापूजा | ९७ |
| १४५ | मालिनीमन्त्रादिन्यासः | १०२ |
| १४६ | अष्टाष्टकदेवी | १०५ |
| १४७ | त्वरितापूजादिः | १०९ |
| १४८ | सङ्ग्रामविजयपूजा | १११ |
| १४९ | अयुतलक्षकोटिहोमाः | ११२ |
| १५० | मन्वन्तराणि | ११४ |
| १५१ | वर्णेतरधर्माः | ११७ |

| अध्याये | विषयः | पृष्ठे |
|---|---|---|
| १५२ | गृहस्थवृत्तयः | ... ११९ |
| १५३ | ब्रह्मचर्य्याश्रमः | ... १२० |
| १५४ | विवाहः | ... १२२ |
| १५५ | आचाराध्यायः | ... १२४ |
| १५६ | द्रव्यशुद्धिः | ... १२८ |
| १५७ | शावाशौचादिः | ... १३० |
| १५८ | स्रावाद्यशौचं | ... १३४ |
| १५९ | असंस्कृतादिशौचं | ... १४१ |
| १६० | वानप्रस्थाश्रमः | ... १४३ |
| १६१ | यतिधर्म्मः | .. १४४ |
| १६२ | धर्म्मशास्त्रं | ... १४८ |
| १६३ | श्राद्धकल्पः | ... १५० |
| १६४ | नवग्रहहोमः | ... १५४ |
| १६५ | नानाधर्म्माः | ... १५६ |
| १६६ | वर्णधर्म्माः | ... १५९ |
| १६७ | अयुतलक्षकोटिहोमाः | १६२ |
| १६८ | महापातकादयः | .. १६६ |
| १६९-१७०-१७१-१७२-१७३-१७४ | प्रायश्चित्तानि | ... १७१ |
| १७५ | व्रतपरिभाषा | ... १९२ |
| १७६ | प्रतिपद्व्रतानि | ... १९९ |
| १७७ | द्वितीयाव्रतानि | ... २०० |
| १७८ | तृतीयाव्रतानि | ... २०२ |
| १७९ | चतुर्थीव्रतानि | ... २०६ |
| १८० | पञ्चमीव्रतानि | ... २०७ |
| १८१ | षष्ठीव्रतानि | ... २०७ |
| १८२ | सप्तमीव्रतानि | ... २०८ |
| १८३-१८४ | अष्टमीव्रतानि | ... २०९ |
| १८५ | नवमीव्रतानि | ... २१३ |
| १८६ | दशमीव्रतानि | ... २१५ |
| १८७ | एकादशीव्रतानि | ... २१६ |
| १८८ | द्वादशीव्रतानि | ... २१७ |
| १८९ | श्रवणद्वादशीव्रतं | ... २१९ |
| १९० | अखण्डद्वादशीव्रतं | ... २२१ |
| १९१ | त्रयोदशीव्रतानि | ... २२२ |
| १९२ | चतुर्दशीव्रतानि | ... २२३ |
| १९३ | शिवरात्रिव्रतं | ... २२५ |
| १९४ | अशोकपूर्णिमादिव्रतं | २२६ |
| १९५ | वारव्रतानि | ... २२७ |
| १९६ | नक्षत्रव्रतानि | ... २२८ |
| १९७ | दिवसव्रतानि | ... २३१ |
| १९८ | मासव्रतानि | ... २३२ |
| १९९ | नानाव्रतानि | ... २३५ |
| २०० | दीपदानव्रतं | ... २३६ |
| २०१ | नवव्यूहार्च्चनं | ... २३८ |
| २०२ | पुष्पाध्यायः | ... २४० |
| २०३ | नरकस्वरूपवर्णनं | ... २४३ |
| २०४ | मासोपवासव्रतं | ... २४६ |
| २०५ | भीष्मपञ्चकव्रतं | .. २४८ |
| २०६ | अगस्त्यार्घ्यदानव्रतं | .. २४९ |
| २०७ | कौमुदव्रतं | ... २५१ |
| २०८ | व्रतदानादिसमुच्चयः | ... २५२ |
| २०९ | दानपरिभाषा | .. २५५ |
| २१० | महादानानि | ... २६१ |
| २११ | नानादानानि | .. २६५ |
| २१२ | मेरुदानानि | ... २७० |

| अध्याये | विषयः | पृष्ठे |
|---|---|---|
| २१३ | पृथ्वीदानानि | ... २७६ |
| २१४ | मन्त्रमाहात्म्यं | ... २७७ |
| २१५ | सन्ध्याविधिः | .. २८२ |
| २१६-२१७ | गायत्रीनिर्वाणं | ... २८७ |
| २१८ | राजाभिषेकः | ... २९१ |
| २१९ | अभिषेकमन्त्राः | .. २९४ |
| २२० | सहायसम्पत्तिः .. अनुजीविवृत्तञ्च | .. ३०२ |
| २२१ | दुर्गसम्पत्तिः | ... ३०६ |
| २२२-२२३-२२४-२२५-२२६- | राजधर्म्माः | ... ३०९ |
| २२७ | युद्धयात्रा | ... ३२९ |
| २२८ | स्वप्नाध्यायः | ... ३३० |
| २२९-२३०-२३१ | शकुनफलं | ... ३३३ |
| २३२ | यात्रामण्डलचिन्तादिः | ३४२ |
| २३३ | षाड्गुण्यं | ... ३४५ |
| २३४ | प्रात्यहिकराजकर्म | ... ३४८ |
| २३५ | रणदीक्षा | .. ३५० |
| २३६ | श्रीस्तोत्रं | ... ३५७ |
| २३७ | रामोक्तनीतिः | .. ३५९ |
| २३८ | राज्याङ्गानि | ... ३६१ |
| २३९ | द्वादशराजमण्डलानि .. सन्धिविग्रहादयश्च । | .. ३६६ |
| २४० | सामाद्युपायाः | ... ३७० |
| २४१ | राजनीतिः | .. ३७६ |
| २४२ | पुरुषलक्षणं | .. ३८४ |
| २४३ | स्त्रीलक्षणं | ... ३८६ |
| २४४ | आयुधलक्षणं | .. ३८७ |
| २४५ | रत्नपरीक्षा | ... ३९० |
| २४६ | वास्तुलक्षणं | ... ३९२ |
| २४७ | पुष्पादिपूजाफलं | ... ३९५ |
| २४८-२४९ २५०-२५१ | धनुर्वेदः । | ... ३९६ |
| २५२-२५३ | व्यवहाराः | ... ४०७ |
| २५४ | दिव्यप्रमाणानि | .. ४१६ |
| २५५ | दायविभागः | ... ४२१ |
| २५६ | सीमाविवादादिनिर्णयः | ४२५ |
| २५७ | वाक्पारुष्यादिप्रकरणं | ४३० |
| २५८ | ऋग्विधानं | ... ४३८ |
| २५९ | यजुर्विधानं | ... ४४७ |
| २६० | सामविधानं | ... ४५५ |
| २६१ | अथर्वविधानं | ... ४५८ |
| २६२ | उत्पातशान्तिः | ... ४६१ |
| २६३ | देवपूजावैश्वदेवादिबलिः | ४६४ |
| २६४ | दिक्पालादिस्नानं | ... ४६७ |
| २६५ | विनायकस्नानं | ... ४६९ |
| २६६ | माहेश्वरस्नानलक्षकोटि— .. होमादयः | .. ४७२ |
| २६७ | नीराजनाविधिः | ... ४७४ |
| २६८ | छत्रादिमन्त्रादयः | ... ४७८ |

वर्ज्जयेच्छ्वित्रिकुष्ठ्याद्यांश्च गृह्णीयाद्विमन्त्रितान् ।
स्नातांश्छुचींस्तथा दान्तान् प्राङ्मुखान् देवकर्म्मणि ॥४॥
उपवेशयेत्त्रीन् पित्र्यादीनेकैकमुभयत्र वा ।
एवं मातामहादेश्च शाकैरपि च कारयेत् ॥ ५ ॥
तद्दिने ब्रह्मचारी स्यादकोपोऽत्वरितो मृदुः(१) ।
सत्योऽप्रमत्तोऽनध्वन्यो अस्वाध्यायश्च(२) वाग्यतः ॥ ६ ॥
सर्वांश्च पङ्क्तिमूर्द्धन्यान् पृच्छेत् प्रश्ने तथासने ।
दर्भानास्तीर्य्य द्विगुणान् पित्रे देवादिकञ्चरेत् ॥ ७ ॥
विश्वान्देवानावाहयिष्ये पृच्छेदावाहयेति च ।
विश्वेदेवास आवाह्य विकीर्य्याथ यवान् जपेत् ॥ ८ ॥
विश्वे देवाः शृणुतेमं पितॄनावाहयिष्ये च ।
पृच्छेदावाहयेत्युक्तो उशन्तस्त्वा समाह्वयेत् ॥ ९ ॥
तिलान् विकीर्य्याथ जपेदायान्त्वित्यादि पितृके ।
सपवित्रे निषिच्याद्भिः शन्नो देवीरभि त्वचा ॥ १० ॥
यवोऽसीति यवान् दत्वा पित्रे सर्वत्र वै तिलान् ।
तिलोऽसि सोमदेवत्यो गोसवो देवनिर्म्मितः ।
प्रत्नमद्भिः पृक्तः स्वधया पितॄन् लोकान् प्रीणाहि नः स्वधा । इति ।
श्रीश्च तेति ददेत्पुष्पं पात्रे हैमेऽथ राजते ॥ ११ ॥
औदुम्बरे वा खड्गे वा पर्णपात्रे प्रदक्षिणम् ।
देवानामपसव्यं तु पितॄणां सव्यमाचरेत् ॥ १२ ॥

---

१ चत्वरितोऽत्युक्तिरिति ङ० । ख०, ग० च ।
२ सत्ये प्रपन्नोऽनध्वन्यो स्वाध्यायश्चेति

अश्लेषा चाश्विनी चैव यात्रासिद्धिस्तु सम्पदा(१) ॥ ४३ ॥
त्रिषूत्तरेषु रोहिण्यां सिनीवाली चतुर्द्दशी।
श्रवणा देव हस्ता च चित्रा च वैष्णवी तथा ॥ ४४ ॥
गोष्ठयात्रां न कुर्वीत प्रवेशं नैव कारयेत्।
अनिलोत्तररोहिण्यां मृगमूलपुनर्वसौ ॥ ४५ ॥
पुष्यश्रवणहस्तेषु कृषिकर्म्म समाचरेत्(२)।
पुनर्वसूत्तरास्वातीभगमूलेन्द्रवारुणे(३) ॥ ४६ ॥
गुरोः शुक्रस्य वारे वा वारे च(४) सोमभास्वतोः।
वृषलग्ने च कर्त्तव्यङ्कन्यायां मिथुने तथा ॥ ४७ ॥
द्विपञ्च(५) दशमी सप्त तृतीया च त्रयोदशी।
रेवतीरोहिणीन्द्राग्निहस्तमैत्रोत्तरेषु(६) च ॥ ४८ ॥
मन्दारवर्ज्जं वीजानि वापयेत् सम्पदर्थपि(७)।
रेवतीहस्तमूलेषु श्रवणे भगमैत्रयोः ॥ ४९ ॥
पितृदैवे तथा सौम्ये धान्यच्छेदं मृगोदये।
हस्तचित्रादितिस्वातौ रेवत्यां श्रवणत्रये ॥ ५० ॥
स्थिरे लग्ने (८) गुरोर्वारे अथ(९) भार्गवसौम्ययोः।
याम्यादितिमघाज्येष्ठासूत्तरेषु प्रवेशयेत् ॥ ५१ ॥

---

१ यात्रासिद्धिस्तु सम्पद इति ग०, ज० च।
२ समारभेदिति ख०, छ० च।
३ भगमूले च वारुणे इति ख०, छ० च।
४ वारे वा इति ज०।
५ द्विजन्मेति ज०।
६ चक्रमैत्रोत्तरासु इति ज०।
७ वापयेत् सर्वतोऽपि चेति ख०, ग०, ज० च।
८ चरे लग्ने इति ज०।
९ गुरोर्वारेऽथवा इति ख०, ज० च।

दुर्भिक्षं राजसङ्ग्रामो दम्पत्योः संशयो भवेत् ॥ ६९ ॥
आधाने जन्मनक्षत्रे व्याधौ क्लेशादिकं भवेत् ।
कृत्तिकायान्नवदिनन्त्रिरात्रं रोहिणीषु च ॥ ७० ॥
मृगशिरःपञ्चरात्रं आर्द्रासु(१) प्राणनाशनं ।
पुनर्वसौ च पुष्ये च सप्तरात्रं विधीयते ॥ ७१ ॥
नवरात्रं तथाश्लेषा श्मशानान्तं मघासु च ।
द्वौ मासौ पूर्वफाल्गुन्यामुत्तरासु त्रिपक्षकम्(२) ॥ ७२ ॥
हस्ते तु दृश्यते चित्रा अर्द्धमासन्तु पीडनम् ।
मासद्वयन्तथा स्वातिर्विशाखा त्रिंशतिर्दिनं ॥ ७३ ॥
मैत्रे चैव दशाहानि ज्येष्ठास्वेवार्द्धमासकम् ।
मूले न जायते मोक्षः पूर्वाषाढा त्रिपक्षकम्(३) ॥ ७४ ॥
उत्तरा दिनविंशत्या द्वौ मासौ श्रवणेन च ।
धनिष्ठा चार्द्धमासञ्च वारुणे च दशाहकम् ॥ ७५ ॥
न च भाद्रपदे मोक्ष उत्तरासु त्रिपक्षकम् ।
रेवती दशरात्रञ्च अहोरात्रन्तथाश्विनी ॥ ७६ ॥
भरण्यां प्राणहानिः स्याद् गायत्रीहोमतः शुभं ।
पञ्चधान्यतिलाज्याद्यैर्धेनुदानन्द्विजे शमं ॥ ७७ ॥
दशा सूर्य्यस्य षष्ठाब्दा इन्दोः पञ्चदशैव तु ।
अष्टौ वर्षाणि भौमस्य दशसप्तदशा बुधे ॥ ७८ ॥

---

१ आर्द्रायामिति ग॰, ङ॰ च ।
२ उत्तरासु त्रिरात्रकमिति ङ॰ ।
३ पूर्वाषाढादिनपञ्चकमिति ङ॰ । हस्ते तु दृश्यते इत्यादिः, पूर्वाषाढा-त्रिपक्षकमित्यन्तः पाठः ख॰, ङ॰, पुस्तकद्वये नास्ति ।

शुक्लाष्टम्यां दक्षिणे च एकादश्यां भृशन्त्यजेत्।
रौद्रश्चैव तथा श्वेतो मैत्रः सारभटस्तथा ॥ १५ ॥
सावित्रो विरोचनश्च जयदेवोऽभिजित्तथा(१)।
रावणो विजयश्चैव नन्दी वरुण एव च ॥ १६ ॥
यमसौम्यौ भवश्चान्ते दशपञ्चमुहूर्त्तकाः।
रौद्रे रौद्राणि कुर्वीत श्वेते स्नानादिकं चरेत् ॥ १७ ॥
मैत्रे कन्याविवाहादि शुभं सारभटे चरेत्।
सावित्रे स्थापनाद्यं वा विरोचने नृपक्रिया ॥ १८ ॥
जयदेवे जयं कुर्य्याद् रावणे रणकर्म्म च(२)।
विजये कृषिवाणिज्यं पटबन्धं च नन्दिनि ॥ १९ ॥
वरुणे च तड़ागादि नांशकर्म्म यमे चरेत्।
सौम्ये सौम्यादि कुर्व्वीत भवेल्लग्नमहर्दिवा ॥ २० ॥
योगा नाम्ना विरुद्धाः स्युर्योगा नाम्नैव शोभनाः।
राहुरिन्द्रात्समीरञ्च वायोर्द्दचं यमाच्छिवम्(३)॥ २१ ॥
शिवादाप्यञ्जलादग्निरग्नेः सौम्यन्ततस्त्वयम्।
ततश्च सङ्क्रमं हन्ति चतस्रो घटिकाभ्रमन् ॥ २२ ॥

राहुचक्रं।

चण्डेन्द्राणी वाराही च मुशली गिरिकर्णिका।
बला चातिबला चौरी मल्लिकाजातियूथिकाः ॥ २३ ॥
यथालाभं धारयेत्ताः श्वेतार्कश्च शतावरी।
गुडूची वागुरी दिव्या श्रोषध्यो धारिता जये ॥ २४ ॥

---

१ स्पन्दनमित्यादिः, जयदेवोभिजिन्तथेत्यन्तः पाठः घ० पुस्तके नास्ति।
२ जीवकर्म चेति ख०।
३ वायोर्याम्यं ततः शिवमिति घ०।

नाडीयं प्रथमा चान्या याम्यं मृगशिरस्तथा ।
पुष्यं भाग्यस्तथा चित्रा मैत्रश्चाप्यं च वासवं ॥ ३ ॥
अश्विन्यं तृतीयाथ कृत्तिका रोहिणी ग्रहिः ।
चित्रा स्वाती विशाखा च श्रवणा रेवती च भं ॥ ४ ॥
नाड़ीत्रितयसंजुष्टग्रहाज् ज्ञेयं शुभाशुभं ।
चक्रम्फणीश्वरन्तत्तु(१) त्रिनाड़ीपरिभूषितं ॥ ५ ॥
रविभौमार्कराहुस्थमशुभं स्याच्छुभं परं ।
देशग्रामयुता भ्रातृभार्य्याद्या एकशः शुभाः ॥ ६ ॥

अ, भ, कृ, रो, मृ, आ, पु, पु, अ, म, पू, उ, ह, चि, स्वा, वि, अ, ज्ये, मू, पू, उ, अ, ध, श, पू, उ, रे । अत्र सप्तविंशतिनक्षत्राणि ज्ञेयानि ।

इत्याग्नेये महापुराणे युद्धजयार्णवे नक्षत्रचक्रं नाम षट्त्रिंशदधिकशततमोऽध्यायः ॥

---

## अथ सप्तत्रिंशदधिकशततमोऽध्यायः ।

### महामारीविद्या ।

ईश्वर उवाच । महामारीं प्रवक्ष्यामि विद्यां शत्रुविमर्द्दिनीं ।

---

१ चक्रम्फणीश्वरन्वहन् इति ग०, घ०, ङ०, झ०, ञ० च ।

स्वर्भानुः क्षेममारोग्यं तारणे जलदाः शुभाः ॥ ५ ॥
पार्थिवे शस्यसम्पत्तिरतिवृष्टिस्तथा जयः।
सर्वजिल्युत्तमा वृष्टिः सर्वधारी सुभिक्षदः ॥ ६ ॥
विरोधी जलदान् हन्ति विकृतश्च भयङ्करः।
खरे भवेत् पुमान् वीरो नन्दने नन्दते प्रजा ॥ ७ ॥
विजयः शत्रुहन्ता च शत्रुरोगादि मर्द्दयेत्।
ज्वरार्त्तो मन्मथे लोको दुष्करे दुष्करा प्रजाः ॥ ८ ॥
दुर्मुखे दुर्मुखो लोको(१) हेमलम्बे न सम्पदः।
संवत्सरो महादेवि विलम्बस्तु सुभिक्षदः ॥ ९ ॥
विकारी शत्रुकोपाय विजये सर्वदा क्वचित्।
प्लवे प्लवन्ति तोयानि शोभने शुभकृत्प्रजा ॥ १० ॥
राक्षसे निष्ठुरो लोको विविधश्वान्यमानने।
सुवृष्टिः पिङ्गले क्वापि काले शस्तो धनक्षयः॥ ११ ॥
सिद्धार्थे सिद्धते सर्व्वं रौद्रे रौद्रं प्रवर्त्तते।
दुर्म्मतौ मध्यमा वृष्टिर्दुन्दुभिः क्षेमधान्यकृत् ॥ १२ ॥
स्रवन्ते रुधिरोद्गारी रक्ताक्षः क्रोधनो जयः।
क्षये क्षीणधनोलोकः(२) षष्टिसंवत्सराणि तु ॥ १३ ॥

इत्याग्नेये महापुराणे युद्धजयार्णवे षष्टिसंवत्सराणि नाम ऊनचत्वारिंशदधिकशततमोऽध्यायः ॥

१ दुर्मुखे मुखरो लोक इति ख०, घ०, ङ०, ञ० च।
२ क्षीणधवो लोक इति क०। क्षीणजनो लोक इति ञ०

कमलो माणिक्यकण्ठो गगनः कुमुदस्ततः।
श्रीपद्मो भैरवानन्दो देवः कमल इत्यतः॥ ९॥
शिवो भवोऽथ क्षणाश्च नवसिद्धाश्च षोडश।
चन्द्रपूरोऽथ गन्धाश्च शुभः कामोऽतिमुक्तकः(१)॥ १०॥
कण्ठो वीरः(२) प्रयोगोऽथ कुशलो देवभोगकः।
विश्वदेवः खड्गदेवो रुद्रो धाताऽसिरेव च॥ ११॥
मुद्रास्फोटी वंशपूरो भोजः षोडश सिद्धकाः।
समयान्यस्तु देहस्य पीठान्यासेन यन्त्रितः॥ १२॥
प्रक्षिप्य मण्डले पुष्पं मण्डलान्यथ पूजयेत्।
अनन्तश्च महान्तश्च सर्वदा शिवपादुकां॥ १३॥
महाव्याप्तिश्च शून्यश्च पञ्चतत्त्वात्ममण्डलं।
श्रीकण्ठनाथपादुकां शङ्करानन्तको यजेत्॥ १४॥
सदाशिवः पिङ्गलश्च भृग्वानन्दश्च नाथकः।
लाङ्गलानन्दसंवर्त्तौ मण्डलस्यान्तके यजेत्॥ १५॥
नैर्ऋत्ये श्रीमहाकालः पिनाकी च महेन्द्रकः।
खड्गो भुजङ्गो बाणश्च अघासिः शब्दको वशः॥ १६॥
आशारूपो नन्दरूपो बलिन्दत्वा क्रमं यजेत्।

क्रीं खं खं क्षं सौं वटुकाय अवर अर्घं पुष्पं धूपं दीपंगन्धं बलिं पूजां गृह्ण२ नमस्तुभ्यं। ओं क्रां क्रीं क्रूं क्षें क्षेत्रपालाय अवतर२ महाकपिलजटाभार भास्वरत्रिनेत्रज्वालामुख एह्येहि गन्धपुष्पबलिपूजां गृह्ण२ खः खः ओं कः ओं लः ओं महाडामराधिपतये(३) स्वाहा।

---

१ कामोऽथ मुक्तक इति ख०, ग०, ज० च। ३ प्रमथाधिपतये इति ङ०। महामामाधिपतये इति ज०।
२ वटो घोर इति ज०, ङ० च।

ततः समभिगच्छेत योगक्षेमार्थमीश्वरं।
स्वजनात्मनापनयेत् खरादिक-रजस्त्यजेत् ॥ २३ ॥
हीनाश्चावहसेत् गच्छेन्नादेशे निवसेन्न तैः।
वैद्यराजनदीहीने म्लेच्छस्त्रीबहुनायके ॥ २४ ॥
रजस्वलादिपतितैर्न भाषेत् केशवं स्मरेत्।
नासंवृतमुखः कुर्य्याद्धासं(१) जृम्भां तथा सृतं ॥ २५ ॥
प्रभोरप्यवमानं स्वङ्गोपयेद्वचनं बुधः।
इन्द्रियाणां नानुकूली वेगरोधं न कारयेत् ॥ २६॥
नोपेक्षितव्यो व्याधिः स्याद्रिपुरल्पोऽपि(२) भार्गव।
रथ्यातिगः सदाचामेत्(३) बिभृयान्नाग्निवारिणी ॥ २७ ॥
न हुङ्कुर्य्याच्छिवं पूज्यं पादं पादेन नाक्रमेत्।
प्रत्यक्षं वा परोक्षं वा कस्य चिन्नाप्रियं वदेत् ॥ २८ ॥
वेदशास्त्रनरेन्द्रर्षिदेवनिन्दां विवर्जयेत्।
स्त्रीणामीर्षा(४) न कर्त्तव्या विश्वासन्तासु वर्जयेत् ॥२९ ॥
धर्मश्रुतिं देवरतिं(५) कुर्य्याद्धर्मादि नित्यशः(६)।
सोमस्य पूजां जन्मर्क्षे विप्रदेवादिपूजनं ॥ ३० ॥

---

१ कुर्य्याद्धास्यमिति ख०, ङ० च।
२ रिपुर्वतोपि इति क०।
३ समाचामेद्दिति ख०।
४ स्त्रीणामिर्ष्येति क०।
५ देवमतिमिति ग०, ख०, घ०, ङ०, ट० च। वेदमतिमिति ख०, घ० च।
६ भद्रं भद्रमिति ब्रूयादित्यादिः, कुर्य्याद्धर्मादि नित्यश इत्यन्तः पाठः ख० पुस्तके नास्ति।

सङ्ग्रामे जयमाप्नोति प्रेतेऽनाथे च काष्ठदः ।
सङ्कल्प्य बान्धवं प्रेतमपसव्येन तां चितिं ॥ ३६ ॥
परिक्रम्य ततः स्नानं कुर्य्युः सर्व्वे सवाससः ।
प्रेताय च तथा दद्युस्त्रींस्त्रींश्चैवोदकाञ्जलीन् ॥ ३७ ॥
द्वार्य्यश्मनि पदं दत्वा प्रविशेयुस्तथा गृहं ।
अक्षतांश्चिक्षिपेद्वह्नौ निम्बपत्रं विदश्य च ॥ ३८ ॥
पृथक् शयीरन् भूमौ च क्रीतलब्धाशनी भवेत् ।
एकः पिण्डो दशाहे तु श्मश्रुकर्म्मकरः शुचिः ॥ ३९ ॥
सिद्धार्थकैस्तिलैर्व्विद्वान् मज्जेद्वासोपरं दधत्(१) ।
अजातदन्ते तनये शिशौ गर्भस्रुते तथा ॥ ४० ॥
कार्य्यो नैवाग्निसंस्कारो नैव चास्योदकक्रिया ।
चतुर्थे च दिने कार्य्यस्तथास्थ्नां चैव सञ्चयः ॥ ४१ ॥
अस्थिसञ्चयनादूर्द्ध्वमङ्गस्पर्शो विधीयते ।

इत्याग्नेये महापुराणे शावाशौचं नाम सप्तपञ्चाशदधिकशततमोऽध्यायः ॥

## अथाष्टपञ्चाशदधिकशततमोऽध्यायः ।

——:○:——

### स्रावाद्यशौचं ।

पुष्कर उवाच । स्रावाशौचं प्रवक्ष्यामि मन्वादिमुनिसम्मतं ।

---

१ सिद्धार्थकैस्तिलैर्विप्रान् मज्जद्वासोऽपरं यकैस्तिलैर्विद्वान् स्नायाद्वासोऽपरं दधदिति ग०, ङ०, ञ० च । सिद्धा- दधदिति ग०, ट० च ।

चतुर्हस्तं चाष्टहस्तं कुण्डन्हादश च द्विजाः।
पञ्चविंशं षोडशं वा पटे हारे चतुष्टयं ॥ ३९ ॥
कोटिहोमी सर्वकामी विष्णुलोकं स गच्छति।
होमस्तु ग्रहमन्त्रैर्व्वा गायत्र्या वैष्णवैरपि ॥ ४० ॥
जातवेदोमुखैः शैवैः(१) वैदिकैः प्रथितैरपि।
तिलैर्यवैर्घृतैर्व्रीह्यैरश्वमेधफलादिभाक् ॥ ४१ ॥
विद्वेषणाभिचारेषु त्रिकोणं कुण्डमिष्यते।
समिधो वामहस्तेन श्येनास्थ्यनलसंयुताः ॥ ४२ ॥
रक्ताम्बरैर्मुक्तकेशैर्ध्यायद्भिरशिवं रिपोः।
दुर्म्मित्रियास्तस्मै सन्तु यो द्वेष्टि हुं फडिति च ॥ ४३॥
छिन्द्यात् क्षुरेण प्रतिमां पिष्टरूपं रिपुं हनेत्(२)।
यजेदेकं षोड़कं वा यः स कृत्वा दिवं व्रजेत् ॥ ४४ ॥

इत्याग्नेये महापुराणेऽयुतलक्षकोटिहोमा नाम सप्तषष्ट्यधिकशततमोऽध्यायः॥

## अथाष्टषष्ट्यधिकशततमोऽध्यायः।

—:०:—

### महापातकादिकथनम्।

पुष्कर उवाच। दण्डं कुर्य्यान्नृपो नृणां प्रायश्चित्तमकुर्वतां।
कामतोऽकामतो वापि प्रायश्चित्तं कृतं चरेत् ॥ १ ॥

---

१ जातवेदोमुखैः सौरैरिति ख०। २ रिपुं चरेदिति ख०, ज० च।

विश्वेश्वरं कार्त्तिके तु मदनाख्यौ यजेद्व्रती।
शिवं हैमन्तु वर्षान्ते सच्छायाम्रदलेन तु॥ ८।
वस्त्रेण पूजयित्वा तु दद्याद्विप्राय शान्तथा।
शयनञ्छत्रकलशान् पादुकारसभाजनम्॥ ९॥
त्रयोदश्यां सिते चैत्रे रतिप्रीतियुतं स्मरन्।
अशोकाख्यं नगं लिख्य सिन्दूररजनीमुखैः॥ १०॥
अब्दं यजेत् कामार्थी कामत्रयोदशीव्रतम्।

इत्याग्नेये महापुराणे त्रयोदशी व्रतानि नामैकनवत्यधिकशततमोऽध्यायः॥

---

## अथ द्विनवत्यधिकशततमोऽध्यायः।

—:○:—

### चतुर्दशीव्रतानि।

अग्निरुवाच। व्रतं वच्ये चतुर्द्दश्यां भुक्तिमुक्तिप्रदायकम्[1]।
कार्त्तिके तु चतुर्द्दश्यां निराहारी यजेच्छिवम्॥ १॥
वर्षम्भोगधनायुष्मान्[2] कुर्वन् शिवचतुर्द्दशीम्।
मार्गशीर्षे सितेऽष्टम्यां व्रते शायां मुनिव्रतः॥ २।

---

१ भुक्तिमुक्तिप्रदं शृणु इति ख०, घ०। भुक्तिमुक्तिसुखप्रदमिति क०। ञ०, ङ०, अ०, ट०, च।
२ भोगवस्त्रायुष्मानिति क०।

क्षारह्रदे(१) प्राणिहन्ता क्षुरधारे च भूमिहृत्।
अम्बरीषे गोस्वर्णहृद् द्रुमच्छिद्वज्रशस्त्रके॥ १६॥
मधुहर्त्ता परीतापे कालसूत्रे परार्थहृत्।
कश्मलेऽत्यन्तमांसाशी उग्रगन्धे ह्यपिण्डदः॥ १७॥
दुर्धरे तु काचभक्षी वन्दिग्राहरताश्च ये।
मञ्जुषे नरके लोहेऽप्रतिष्ठे श्रुतिनिन्दकः॥ १८॥
पूतिवक्त्रे कूटसाक्षी परिलुण्ठे धनापहा।
बालस्त्रीवृद्धघाती च कराले ब्राह्मणार्त्तिकृत्॥ १९॥
विलेपे मद्यपो विप्रो महाताम्रे तु भेदिनः(२)॥ २०॥
तथाक्रम्य पारदारान् ज्वलन्तीमायसीं शिलां।
शाल्मलाख्ये तमालिङ्गन् नारी बहुनरङ्गमा॥ २१॥
आस्फोटजिह्वोद्धरणं स्नोक्षणान् नेत्रभेदनं।
अङ्गारराशौ क्षिप्यन्ते मातृपुत्र्यादिगामिनः॥ २२॥
चौराः क्षुरैश्च भिद्यन्ते स्वमांसाशी च मांसभुक्।
मासोपवासकर्त्ता वै न याति नरकन्नरः॥ २३॥
एकादशीव्रतकरो भीष्मपञ्चकसद्व्रती।

इत्याग्नेये महापुराणे नरकस्वरूपवर्णनं नाम त्र्यधिकद्विशततमोऽध्यायः॥

---

१ क्षारकूपे इति ख०, छ० च।

२ महाप्रेते तु भेदिन इति ख०, ग०, घ०, ङ०, छ०, ञ० च।

प्रतिलाभेच्छया दत्तं यद्धनं तदपार्थकं ॥ ३० ॥
श्रद्धया साध्यते धर्म्मो दत्तं वार्य्यपि चाक्षयं ।
ज्ञानशीलगुणोपेतः परपीड़ावहिष्कृतः ॥ ३१ ॥
अज्ञानां पालनात्त्राणात्तत् पात्रं परमं स्मृतं ।
मातुः शतगुणं दानं सहस्रं पितुरुच्यते ॥ ३२ ॥
अनन्तं दुहितुर्दानं सोदर्य्ये दत्तमक्षयं ।
अमनुष्ये समं दानं पापे क्षेयं महाफलं ॥ ३३ ॥
वर्णसङ्करे द्विगुणं शूद्रे दानं चतुर्गुणं ।
वैश्ये चाष्टगुणं क्षत्रे षोड़शत्वं द्विजब्रुवे ॥ ३४ ॥
वेदाध्याये शतगुणमनन्तं वेदबोधके(१) ।
पुरोहिते याजकादौ(२) दानमक्षयमुच्यते ॥ ३५ ॥
श्रोत्रियहीनेषु यद्दत्तं तदनन्तं च यज्वनि ।
अतपस्त्वनधीयानः प्रतिग्रहरुचिर्द्विजः ॥ ३६ ॥
अम्भस्यश्मप्लवेनैव सह तेनैव मज्जति ।
स्नातः सम्यगुपस्पृश्य गृह्णीयात् प्रयतः शुचिः ॥ ३७ ॥
प्रतिगृह्णीता सावित्रीं सर्वदैव प्रकीर्त्तयेत्(३) ।
ततस्तु कीर्त्तयेत्सार्द्धं द्रव्येण सह दैवतं ॥ ३८ ॥
प्रतिग्राही पठेदुच्चैः प्रतिगृह्य द्विजोत्तमात् ।
मन्दं पठेत् क्षत्रियात्तु उपांशु च तथा विशः ॥ ३९ ॥

---

१ ब्रह्मबोधके इति ख०, ग०, ज०, ञ०, ठ० च।
२ पुरोहिते याचकादाविति ख०, ग०, ठ० च।
३ सर्व्वमेव प्रकीर्त्तयेदिति ख०, ग०, घ०, ङ०, ज०, ञ०, ठ० च।

परि प्रियां हि वः कारिः(१)काम्यां संश्रावयेत्स्त्रियं ॥१३॥
सा तङ्कामयते राम नात्र कार्य्या विचारणा ।
रथन्तरं वामदेव्यं ब्रह्मवर्च्चसवर्द्धनं ॥ १४ ॥
प्राशयेद्बालकं नित्यं वचाचूर्णं घृतप्लुतं ।
इन्द्रमिद्गाथिनं जप्ता भवेच्छ्रुतिधरस्त्वसौ ॥ १५ ॥
हुत्वा रथन्तरञ्जप्ता पुत्रमाप्नोत्यसंशयं ।
मयि श्रीरिति मन्त्रोयं जप्तव्यः श्रीविवर्द्धनः ॥ १६ ॥
वैरूप्यस्याष्टकं नित्यं प्रयुञ्जानः श्रियं लभेत् ।
सप्ताष्टकं प्रयुञ्जानः सर्व्वान् कामानवाप्नुयात् ॥ १७ ॥
गव्येषुणेति यो नित्यं सायं प्रातरतन्द्रितः ।
उपस्थानं गवां कुर्य्यात्तस्य स्युस्ताः सदा गृहे ॥ १८ ॥
घृताक्तन्तु यवद्रोणं वात आवातु भेषजं ।
अनेन हुत्वा विधिवत् सर्व्वां मायां व्यपोहति ॥ १९ ॥
प्रदेवो दासेन तिलान् हुत्वा कार्म्मणकृन्तमं ।
अभि त्वा पूर्व्वपीतये वषट्कारसमन्वितं ॥ २० ॥
वासकेभसहस्रन्तु हुतं युद्धे जयप्रदं ।
हस्त्यश्वपुरुषान् कुर्य्याद्बुधः पिष्टमयान् शुभान् ॥ २१ ॥
परकीयानथोद्दिश्य प्रधानपुरुषांस्तथा ।
सुस्विन्नान्पिष्टकवरान् स्पृशेत् क्षत्य भागशः ॥ २२ ॥
अभि त्वा शूर णोनुमो मन्त्रेणानेन मन्त्रवित् ।
क्षत्वा सर्षपतैलाक्तान् क्रोधेन(२) जुहुयात्ततः ॥ २३ ॥

---

१ परिप्रियाहेव कारिरिति ख०, ङ० च । परिप्रियाहेव कविरिति घ०, अ० च ।

२ मन्त्रेणेति ख०, ङ०, ज० च ।

